VIDYA - A JOURNAL OF GUJARAT UNIVERSITY

*Peer-Reviewed, Multidisciplinary & Multilingual Journal*

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

# ।। बौद्धिकात्मनिर्भरतायाः पथप्रदर्शकं शास्त्रं श्रीमद्भागवतम् ।।

## मिहिर गिरिशभाई पण्ड्या

शोधच्छात्रः(Ph.D), भाषासाहित्यभवनम्, गुजरात युनिवर्सिटी.
दू.सं. - (+91) 8320590337,Email – mhrpandya.mp@gmail.com

## ।। शोधसारः ।। (ABSTRACTS)

विषयोऽस्ति **"बौद्धिकात्मनिर्भरतायाः पथप्रदर्शकं शास्त्रं श्रीमद्भागवतम् "**।। यतो हि लोके सर्वत्र दरिदृश्यमानः श्रीमद्भागवतमहापुराणस्य प्रभावः न केवलं वर्तमानस्थितावेवापि तु यदारभ्यास्य प्रथमं सत्रं सञ्जातं तदारभ्य तथावदेव लोके देशे च वर्तते । एवञ्च न केवलोऽयं प्रभावः जनमनोरञ्जनाय, अपि तु जनमनसि ततोऽप्यधिको प्रभावः दृश्यते । अतः चिन्तितोऽयं विषयः ।।

**"अभ्यासात् प्राप्यते दृष्टिः कर्म सिद्धिप्रकाशिनी ।"** इत्येवं प्रेरणावचः मनसि निधाय शोधपत्रलिखिप्सया मौलिकं चिन्तनं विधाय गुणात्मकः शोधप्रविधेः आश्रयणं कृतम् । येनायं शोधप्रविधिः मे मनसि सुदृष्टा सुस्पष्टा च भवेत् । अनेनात्र शोधपत्रे **"समाजे लोके देशे च दृश्यमानः श्रीमद्भागवतमहापुराणस्य प्रभावः कीदृशः?"** इति विषयः संगृहितः ।

**।। शोधपत्रे बिन्दवः ।।**

**बौद्धिकात्मनिर्भरतायाः फलोद्देश्यम् ।।**

समाजे बौद्धिकात्मनिर्भरतायाः किमुद्देश्यम् ? किञ्च फलम् ? इतीमं विषयं चर्चिष्यते । यथा – "स्वातंत्र्यम्,स्वावलम्बनम् सद्ज्ञानप्राप्तिः" इति उद्देशप्राप्तये **बौद्धिकात्मनिर्भरता** मूले अस्ति । तया सिद्धाः सप्तसिद्धयः ।

ताश्च -

**१)** **ज्ञानात्मको विकासः भवति ।**
**२)** **समस्यायाः समाधानं लभते ।**
**३)** **परापेक्षा व्यपगता भवति ।**
**४)** **आत्मविश्वासस्य वृद्धिः भवति ।**
**५)** **अग्रणिर्भवति ।**
**६)** **दुर्लभं पदं लभते ।**
७) **पदप्राप्तेः संतोषः जायते ।**

**बौद्धिकात्मनिर्भरता प्राप्तये श्रीमद्भागवतपुराणस्य का भूमिका ?**

**"नैकेषु शास्त्रेषु बौधिकात्मनिर्भरताप्राप्तये श्रीमद्भागवतमहापुराणस्य का भूमिका? " इति विषयस्य निरूपणार्थं चत्वारः इमे बिंदवः ।**

**१)** **भागवते कथाख्यानोपाख्यानादिषु दृग्गोचरीभूता बौधिकात्मनिर्भरता ।।**
**२)** **भागवतपारायणेन प्रेरिता बौधिकात्मनिर्भरता ।।**
**३)** **भागवताध्ययनेन दृढा बौधिकात्मनिर्भरता ।।**
**४)** **भागवतपाकेन पक्वा बौधिकात्मनिर्भरतायाः माधुर्यम् ।।**

## ।। उपसंहृतिः ।।

शोधपत्रेणानेनेदं सिद्ध्यति यत् - - -

✓ **सत्योपासनायै ज्ञानोपसनायै श्रीमद्भागवतमहापुराणप्रेरितः संकल्पितश्चायं मार्गः बौधिकात्मनिर्भरतायाः मार्ग एव ।**
✓ **श्रीमद्भागवतमहापुराणे वर्तमाना ज्ञानोपासनायाः बौधिकात्मनिर्भरतायाः संकल्पना सुस्पष्टतया दृग्गोचरी भूता जायते ।**
✓ **अद्यापि वर्तमान स्थितौ श्रीमद्भगवतपुराणमाध्यमेन तदुपासकमाध्यमेन च बौधिकात्मनिर्भरतायाः प्रचारः प्रसारश्च सर्वत्र जायते इति सिध्यति ।**
✓ **बौधिकात्मनिर्भरतायाः श्रीमद्भगवतपुराणमाध्यमेनानेन संसिध्यति इति मे दृढो विश्वासः।**

## ।। आधारभूतशब्दाः ।।

**श्रीमद्भागवतमहापुराण , शास्त्रे बौधिकात्मनिर्भरता , आत्मनिर्भरता**

## ।। विषयोपस्थापनम् ।।

**धवं मे माधवं वन्दे मेधावन्तं परं गुरुम् ।**
**धियं मे माधवीं कर्तुमारभे मधुरां गिरम् ।।१।।**[1]

१ ।। प्रास्ताविकम् ।।

१.१ ।। चितो विषयः ।।

[1] स्वनिर्मितपद्यम् क्रम - १ ।

http://vidyajournal.org

विषयोऽस्ति **"बौद्धिकात्मनिर्भरतायाः पथप्रदर्शकं शास्त्रं श्रीमद्भागवतम्"** ॥ यतो हि लोके सर्वत्र दरिदृश्यमानः श्रीमद्भागवतमहापुराणस्य प्रभावः न केवलं वर्तमानस्थितौ एव, अपि तु यदारभ्य अस्य प्रथमं सत्रं सञ्जातं तदारभ्य तथावदेव लोके देशे च वर्तते । एवञ्च न केवलोऽयं प्रभावः जनमनोरञ्जनाय, अपि तु जनमनसि ततोऽप्यधिको प्रभावः दृश्यते । अतः चिन्तितोऽयं विषयः ॥

१.२ ॥ शोधप्रविधिः ॥

**"गुरुभिरुपदिष्टोऽहं कर्तव्योऽभ्यास आदरात् । अभ्यासात् प्राप्यते दृष्टिः कर्म सिद्धिप्रकाशिनी ॥२॥[2]"**
इत्येवं प्रेरणावचः मनसि निधाय शोधपत्रलिखिप्सया मौलिकं चिन्तनं विधाय गुणात्मकः शोधप्रविधेः आश्रयणं कृतम् । येनायं शोधप्रविधिः मे मनसि सुदृढा सुस्पष्टा च भवेत् । अनेनात्र शोधपत्रे **"समाजे लोके देशे च दृश्यमानः श्रीमद्भागवतमहापुराणस्य प्रभावः कीदृशः?"** इति विषयः संगृहितः ।

१.३ ॥ शोधपत्रे बिन्दवः ॥

**१)** **प्रास्ताविकम् ॥**
**२)** **बौद्धिकात्मनिर्भरतायाः फलोद्देश्यम् ॥**
**२.१)** **ज्ञानात्मको विकासः भवति ।**
**२.२)** **समस्यायाः समाधानं लभते ।**
**२.३)** **परापेक्षा व्यपगता भवति ।**
**२.४)** **आत्मविश्वासस्य वृद्धिः भवति ।**
**२.५)** **अग्रणिर्भवति ।**
**२.६)** **दुर्लभं पदं लभते ।**
**२.७)** **पदप्राप्तेः संतोषः जायते ।**
**३)** **बौद्धिकात्मनिर्भरता प्राप्तये श्रीमद्भागवतपुराणस्य का भूमिका ?**
**३.१)** **भागवते कथाख्यानोपाख्यानादिषु दृग्गोचरीभूता बौधिकात्मनिर्भरता ॥**
**३.२)** **भागवतपारायणेन प्रेरिता बौधिकात्मनिर्भरता ॥**
**३.३)** **भागवताध्ययनेन दृढा बौधिकात्मनिर्भरता ॥**
**३.४)** **भागवतपाकेन पक्वा बौधिकात्मनिर्भरतायाः माधुर्यम् ॥**
४) **उपसंहृतिः ॥**
☸ **सन्दर्भग्रन्थसूचिः ॥**
☸ **परिचयः ॥**

## २ बौद्धिकात्मनिर्भरतायाः फलोद्देश्यम् ॥

"**दुर्लभं भारते जन्म**" इति कथनस्य मूलं तु भारतदेशोऽयं विश्वप्राचीनदेशेषु अन्यतमः | भारतवर्षस्य मूले उत भारतीयसंस्कृतेः मूले नैकानि तत्त्वानि सन्ति । तद्यथा **मन्त्रदृष्टारः ऋषयः, नैकानि तीर्थस्थानानि, मन्दिराणि तथा च वैश्विकसाहित्ये आदर्शभूतं प्राचीनतमम् अस्माकं वाङ्मयसाहित्यम्** । वाङ्मयसाहित्ये सत्येव अस्माकम् इयं संस्कृतिः प्राचीनसंस्कृतिषु अग्रिमा प्राचीनतमा च । अस्माकम् ऋग्वेदः प्राचीनसाहित्यस्य विश्वस्य च प्रथमः ग्रन्थः । वाङ्मयसाहित्यस्य कारणदेव अस्माकम् इयं संस्कृतिः शिरच्छत्ररूपेण राराजते । वाङ्मयसाहित्यस्य कारणादेव वयमिदानीं वैश्विकप्राचीनसंस्कृतेः प्रचारकरूपेण गौरनमनुभवामः । श्रीमतः वेदव्यासस्य योगदानेन सम्पूर्णः भारतः उन्नतशिरो भूत्वा विश्वं पश्यति । तादृशमतुल्यं वाङ्मयसाहित्यमुपलभ्य गौरवान्विताः वयम् ।
एतादृशस्य वाङ्मयसाहित्यस्योपरि आदिकालादारभ्य अद्यापि पर्यन्तं बहुविधं चिन्तनं लेखनञ्च जातम् । समये समये च विविधाः आचार्याः पवित्रां भारतभूमिं स्वजीवनमर्पयित्वा वाङ्मयसाहित्यस्य रक्षणमकुर्वन् । एतादृशानां महापुरुषाणां बलिदानेन वेदोपनिषत्साहित्यम् अद्यापि पर्यन्तं सुरक्षितं समुपलब्धञ्च वर्तते ।
कृतज्ञाः वयं यत् एतादृश्यां ज्ञानगङ्गायां स्नातुमवसरो लब्धः । किं च कारणं स्यात् यत्र ज्ञानगङ्गायाः संरक्षणार्थं विकासार्थं च महापुरुषैः स्वकीयं सम्पूर्णं जीवनं समर्पितम् ? किं वा खलु दृष्टं तत्र दीर्घदर्शिभिः? को वा हेतुः तेषां **" यत् ज्ञानगङ्गायाः प्रवाहः अविच्छिनो भूयात् "** इति विचारणे । एतादृशानां नैकानां प्रश्नानां समाधाने एका उक्तिः दृग्गोचरी भूयते । **" भारतस्य प्रतिष्ठे द्वे संस्कृतः संस्कृतिः तथा । "**[3] अस्याः अभिप्रायोस्तु **" ज्ञानगङ्गायाः रक्षणेन भारतस्य रक्षा "** इत्यस्ति । अपि च **" तस्मान्मूलं यत्नतो रक्षणीयं छिन्ने मूले नैव शाखा न पत्रम् । "**[4] इत्यपि सूक्तिः मूलस्य संरक्षणार्थम् अस्मान् प्रेरयति । यतो हि भारतस्य प्रतिष्ठायाम् एव अस्माकं प्रतिष्ठा सा च ज्ञानगङ्गायाः सकाशादेव आगच्छति ।
इत्यस्मादेव कारणात् मन्येऽहं यत् **" विना शास्त्रं बौद्धिकात्मनिर्भरतायाः कल्पना एव व्यर्थाय "** । अपि च लोके दृश्यमाना बौद्धिकात्मनिर्भरता शास्त्रादेव प्रवर्तिता प्रवर्धिता च । एवञ्च शास्त्राधारिता बौद्धिकात्मनिर्भरतायाः एव उद्देशः स्वाश्रयीवृत्तिः , स्वावलम्बनवृत्तिः , स्वातंत्र्यस्य भावः , मुक्तेः भावः इत्यादिकम् अस्ति । तयैव प्राप्ता इमे सप्तफलसिद्धयः ।

**२.१)** **ज्ञानात्मको विकासः भवति ।**
**२.२)** **समस्यायाः समाधानं लभते ।**
**२.३)** **परापेक्षा व्यपगता भवति ।**
**२.४)** **आत्मविश्वासस्य वृद्धिः भवति ।**
**२.५)** **अग्रणिः भवति ।**

[2] मे गुरुभिरुपदिष्टम् ; स्वनिर्मितपद्यम् क्रम - २।
[3] प्रचलिता उक्तिः ॥
[4] प्रचलितं पद्यम् चाणक्यनीतिः (१०/१३) ॥

http://vidyajournal.org

VIDYA - A JOURNAL OF GUJARAT UNIVERSITY

*Peer-Reviewed, Multidisciplinary & Multilingual Journal*

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

**२.६)** **दुर्लभं पदं लभते ।**

**२.७)** **पदप्राप्तेः संतोषः जायते ।**[5]

वस्तुतस्तु वयं जानिम एव यत् " यः / या ज्ञानवान् / ज्ञानयती सः / सा विचारवान् / विचारवती अपि । यः / या विचारवान् / विचारवती सः / सा प्रत्येकस्य विघ्नस्य प्रत्येकायाः समस्यायाः निवारणे प्रयत्नरतः / प्रयत्नरता भवति । तेन च **"कृते प्रयत्ने किं न लभेत[6]"** अर्थात् समस्यायाः समाधानम् अवश्यं प्राप्नोत्येव । सति समाधाने आत्मविश्वासः अभिवृद्ध्येत । अभिवृद्धे च आत्मविश्वासे सः / सा यत्किमपि कार्ये अग्रेसरो / अग्रेसरा भूत्वा अन्यदपि कार्यं सम्पादयति । तेन च लोके देशे च वाञ्छितं पदम् प्राप्नोति । अपि च ज्ञानेन सः / सा ससंतोष जीवनं यापयति । इत्येव कल्पिता दृष्टा च बौद्धिकात्मनिर्भरतायाः सप्तसिद्धयः ।[7]

## ३ बौद्धिकात्मनिर्भरता प्राप्तये श्रीमद्भागवतपुराणस्य का भूमिका ?

धर्मार्थकाममोक्षाख्यः चतुर्विधपुरुषार्थसाधिका अस्माकम् इयं परम्परा **" ऋते ज्ञानान्न मुक्ति " ; " शास्त्रयोनित्वात्[8] "** इति सूत्राणां प्रथमं प्रतिपादनं करोति । तेन सुस्पष्टं प्रतिभाति यत् विना ज्ञानं विना शास्त्रं न किमपि कर्तुं प्रभावामः वयम् । अतस्तत्र " **शास्त्राणां का आवश्यकता** " इति स्पष्टतया ज्ञातुं शक्नुमः । अपि च ज्ञानपरम्परायाः विषय वा शास्त्राणां विषये यदा यदा वैश्विकफलके चर्चा जाता तदा तदा भारतीयज्ञानपरम्परायाः भारतीयशास्त्राणाञ्च स्थानं विशिष्टमेवासीत् ; अस्ति भविष्यति च ।

कारणमत्र यदा अन्यत्र विश्वे केवलं उदरपूरणार्थमेव जीवन्तः आसन् तदा अस्माकं ज्ञानपरम्परायाः सनातनसंस्कृतेः भास्करसदृशी भाः वैश्विकगगने विभ्राजमानास्सन् विविधेषु क्षेत्रेषु ज्ञानप्रकाशवती आसीत् ।

यथा वा आयुर्वेदे शल्यचिकित्सा भवतु अङ्गपरिवर्तनचिकित्सा वा भवतु । धनुर्वेदे शास्त्राणां प्रयोगो वा भवतु । निर्माणकार्ये भवननिर्माणो वा स्यात् । गृह – नगर - आदि निर्माणो वा भवतु । कृषिकार्ये नैकविधाः पद्धतयः भवतु वा जलसंरक्षणाय नैके प्रविधयो वा भवतु ।

यातायातस्य साधननिर्माणे जल – स्थल – वायु – अन्तरिक्ष - यानानि वा भवतु । अपि च धातुविज्ञाने , रसायनविज्ञाने , खगोलीयविज्ञाने , भूगोलीयविज्ञाने , दुरसंचारक्षेत्रे , भाषाविज्ञाने. . . . . . . . . . . . . . . . कीयन्त्यपि कृता गणना अत्राल्पा एव ।

एतादृशी ज्ञानपरंपरा भगवत: वेदनारायणस्य कृपयैव । तत्रापि परिपक्वफलरूपेण राजते श्रीमद्भागवतमहापुराणम् अपि च लोके श्रीमद्भागवतमहापुराणस्य महान् आदरः ।[9] रामायण - महाभारतसदृशं स्थानं अस्य शास्त्रस्य ।

तथा च ज्ञानिजनेष्वपि उक्तिः प्रचलिता यत् **" विद्यावतां भागवते परीक्षा** "[10] । अनेनैव ज्ञायते यत् बौधिकात्मनिर्भरतायाः मूले ज्ञानम् ; तच्च ज्ञानं शास्त्रे निहितम् ; मणिमयमण्डिते शास्त्रमुकुटे मयूरपिच्छमिव राराजते श्रीमदभागवतमहापुराणम् ।

**"नैकेषु शास्त्रेषु बौद्धिकात्मनिर्भरता प्राप्तये श्रीमद्भागवतमहापुराणस्य का भूमिका ? " इति विषयस्य निरूपणार्थं चत्वारः इमे बिंदवः" ।**

### ३.१ भागवते कथाख्यानोपाख्यानादिषु दृग्गोचरीभूता बौद्धिकात्मनिर्भरता ॥

दशलक्षणोपेतं इदं पुराणं[11] निगमकल्पतरोः गलितं फलमस्ति[12] । अतोऽस्य कथाख्यानोपाख्यानादिषु ज्ञानोपार्जकमस्ति । तत्र च नारदमहर्षेः पूर्वजन्मवृतान्तं वा भवतु, परमभक्तस्य ध्रुवस्य ध्रुवपदप्राप्तिर्वा भवतु , महाराजस्य परिक्षितस्य मोक्षप्राप्तिर्वा भवतु तत्र तत्र सर्वत्र बौद्धिकात्मनिर्भरता दृग्गोचरी भूता जायते ।

यथा वा देवर्षिनारदस्य पूर्वजन्मवृत्तान्ते[13], परमभक्तस्य ध्रुवस्य तपश्चरणे[14], परमभक्तस्य प्रहलादस्य निष्ठायां[15], भगवतः वामनस्य त्रीविक्रमणे[16], नन्दकिशोरस्य भगवतः श्रीकृष्णस्य क्रिडायां[17] च बालकानां कृते ज्ञानानन्देन साकं बौद्धिकात्मनिर्भरतापि प्राप्यते ।

---

[5] महापुरुषाणां गुरुणाञ्च व्याख्यात् गृहिता इमे बौधिकात्मनिर्भरतायाः सप्तसिद्धयः ।

[6] अवनितलं पुनरवतीर्णा स्यात् - संस्कृतगीतस्था उक्तिः ।

[7] महापुरुषाणां गुरुणाञ्च व्याख्यात् गृहिता इमे बौद्धिकात्मनिर्भरतायाः सप्तसिद्धयः ।

[8] श्री बादरायणाभिधेय श्रीवेदव्यासमहर्षिप्रणीतानि श्री ब्रह्मसूत्राणि १/१/३ ।

[9] निगमकल्पतरोः गलितं फलम् श्रीमद्भागवतपुराणम् - १/१/३ ।

[10] प्रचलिता सूक्तिः ॥

[11] सर्गोऽस्याथ विसर्गश्च वृत्ति रक्षान्तराणि च ।

वंशो वंशानुचरितं संस्था हेतुरुपाश्रयः ॥

दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।

केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया ॥ श्रीमद्भागवतपुराणम् -१२/७/९-१०

[12] निगमकल्पतरो: गलितं फलम् श्रीमद्भागवतपुराणम् - १/१/३ ।

[13] श्रीमद्भागवतपुराणम् – स्कन्ध १ / अध्याय – ५,६

[14] श्रीमद्भागवतपुराणम् – स्कन्ध ४ / अध्याय – ८

[15] श्रीमद्भागवतपुराणम् – स्कन्ध ७ / अध्याय – ३-१०

[16] श्रीमद्भागवतपुराणम् – स्कन्ध ८ / अध्याय – १६-२४

[17] श्रीमद्भागवतपुराणम् – स्कन्ध १०

http://vidyajournal.org

अथ च युवकाणां कृते तु राज्ञः परिक्षितस्य[18] , राज्ञः ययातेः[19] , राज्ञः अम्बरिषस्य[20] , नाभागस्य[21] , बलिमहाराजस्य[22] , भगवदवतारस्य पृथोः[23] , वृत्रासुरस्य[24] , राज्ञः प्रियव्रतस्य[25] , कर्दममहर्षेः[26] , दधिचमहर्षेः[27] तत्तत् कथाख्यानोपाख्यानादिषु स्वाभाविकं ज्ञानं निहितमस्ति । तेन च युवा प्रेरितः सन् बौद्धिकात्मनिर्भरो भवति ।

अपि च नारीरत्नेषु देवहूती[28] , कुन्ति[29] , उत्तरा , माता पार्वती[30], दिति[31] , अदिति[32] इत्येतासां सन्ति नैकाः कथाः यया स्त्रीणामपि ज्ञानप्राप्तिः सन् बौद्धिकात्मनिर्भरा भवति ।

महर्षिव्यासः , शौनकादयश्च स्वप्रवृत्या ज्ञानिजनेभ्यः कृते **" ज्ञानाय सततं प्रयत्नरतः भवतु "** इति प्रेरयति ।

एतेनैव ज्ञायते यत् श्रीमद्भागवतमहापुराणे प्रतिपदं प्रतिपद्यं च परं सत्यस्य उपासना एव दृश्यते यश्च बौद्धिकात्मनिर्भरतायाः मूलं वर्तते ।

### ३.२ भागवतपारायणेन प्रेरिता बौद्धिकात्मनिर्भरता ।।

सामान्यतः लोके दृश्यते **" वादे वादे जायते तत्वबोधः "**[33] । तेन ज्ञायते यज्ज्ञानोपार्जनस्य नैकविधेषु मार्गेषु एकः संवादरूपो मार्गः । यः भागवतपारायणेनापि जायते । किञ्चात्र समाजे भागवतपरायणस्य महान्नादरः दृश्यते । तेन कारणेन प्रेरिता बौद्धिकात्मनिर्भरता ।

विषयस्यास्य उपस्थापने कारणमत्र अस्माकम् इयं पारायणपद्धतिः एव । यया पद्धत्या सनातनीयसंस्कृतेः शास्त्रेषु निहितं यज्ज्ञानं तत् अद्यापि पर्यन्तं जनमनसि प्रवर्तमानं प्रवर्धमानं च दृश्यते ।पारायणविधौ अखण्डपारायणादारभ्य नैकाः पद्धतः वर्तन्ते । तेने च जायमानं ज्ञानमेव फलम् । तदेव बौधिकात्मनिर्भरता प्राप्तये मूलमस्ति ।

कयारीत्या ज्ञानं भवति ? इति चेत् यः कोऽपि जनः कथायामुपविष्टः सन् सावधानेन कथां श्रुणोति , सः अवश्यमेव अर्न्तमुखः भूत्वा स्वात्मानं चिन्तयति ; तेन च तस्य तत्र तत्र कृता: क्षतय: दृष्टिपथे आयाति । आगते च ज्ञाने तस्य निवारणार्थम् अवश्यं प्रयत्नरतः भवति ।

अपि च कथायां श्रुते प्रसङ्गे या का अपि जिज्ञासा भवेत् , चेत् तस्याः निवारणार्थं ज्ञानिजनः सम्मुखे एव वर्तते वक्तारूपेण तैः सह संलप्य जिज्ञासा शान्ता भवति ।

तेन च ज्ञानप्राप्तिः भवति । एभिः एव कारणैः ज्ञातुं शक्नुमः यत् अस्माकम् इयं पारायणपद्धतिरपि ज्ञानाय बौधिकात्मनिर्भरतायै च । तेनैव कारणेन स्यात् नैकेषु सम्प्रदायेषु पारायणस्य आज्ञा ।

### ३.३ भागवताध्ययनेन दृढा बौद्धिकात्मनिर्भरता ।।

**" विद्यावतां भागवते परीक्षा "**[34] इति लोकोक्त्या विद्यावतां भागवते परीक्षा भवति । अपि च तेन परीक्षणेन तद्गतज्ञानस्यापि दृढता भवति । इति विश्वासः प्राचिनकालादेव आसीत् ।

दशमशताब्द्याः अनन्तरम् अस्य विश्वासस्य पुष्टिः भवति । तत्र च कारणमस्ति श्रीमत: बोपदेवस्य भागवतोपरि रचिता ग्रन्थावलिः , श्रीमतः श्रीधराचार्यस्य भावार्थदीपिकाटीका तः आरभ्य औद्धवसंप्रदाये[35] श्रीभगवत्प्रसादाचार्येण विरचिता भक्तमनोरञ्जनीटीका पर्यन्तं प्रचलमाना इयं ज्ञानपरम्परा अविच्छिन्ना दृश्यते ।

अनेनैव ज्ञायते यत् श्रीमद्भागवतमहापुराणस्य विशेषतः गाम्भिर्येण अध्ययनं जातम् । **" जाते च अध्ययने किं वा ज्ञानफलं न प्राप्येत ? "** अवश्यं प्राप्यते । अपि च केवलं भावार्थाध्ययनेनापि ज्ञानरूपं फलं प्राप्यते इति समाजे दृश्यते । प्राप्ते च ज्ञाने बौधिकात्मनिर्भरता स्वयं स्फूरिता भवति ।

### ३.४ भागवतपाकेन पक्वा बौद्धिकात्मनिर्भरतायाः माधुर्यम् ।।

पूर्वोक्तेषु बिन्दुषु इदं स्पष्टं भवति यत् येन / यया श्रवणं कृतम् , मननं कृतम् , निदिध्यासं कृतं तेन / तया अवश्यम् ज्ञानरूपं फलं प्राप्तम् वर्तते । किं चात्र विवेचनीयं भगवतः श्रीकृष्णस्य साक्षात् वाङ्मय स्वरूपविषये ; कृतेन स्वल्पेनापि प्रयत्नेन परमकारुणिकः भगवान् श्रीकृष्णः प्रीतः सन् दर्शनं कारयति ।

अनेनैव सत्यज्ञानेन सः जनः तृप्तः भवति । अपि च परमसत्यज्ञानेन सः बौद्धिकात्मनिर्भरो भवति । एवं चोक्ता:[36] सप्तफलसिद्धयः तस्य कृते स्वाभाविकी भवति ।

## ४ ।। उपसंहृतिः ।।

शोधपत्रेणानेनेदं सिद्ध्यति यत् - - -

- ✓ **सत्योपासनायै ज्ञानोपसनायै श्रीमद्भागवतमहापुराणप्रेरितः संकल्पितश्चायं मार्गः बौद्धिकात्मनिर्भरतायाः मार्ग एव।**
- ✓ **श्रीमद्भागवतमहापुराणे वर्तमाना ज्ञानोपासनायाः बौधिकात्मनिर्भरतायाः संकल्पना सुस्पष्टतया दृग्गोचरी भूता जायते ।**
- ✓ **अद्यापि वर्तमानस्थितौ श्रीमद्भगवतमहापुराणमाध्यमेन तदुपासकमाध्यमेन च बौधिकात्मनिर्भरतायाः प्रचारः प्रसारश्च सर्वत्र जायते इति सिध्यति ।**

---

18 श्रीमद्भागवतपुराणम् – स्कन्ध १

19 श्रीमद्भागवतपुराणम् – स्कन्ध ९ / अध्याय – १८,१९

20 श्रीमद्भागवतपुराणम् – स्कन्ध ९ / अध्याय – ४,५

21 श्रीमद्भागवतपुराणम् – स्कन्ध ९ / अध्याय – ४

22 श्रीमद्भागवतपुराणम् – स्कन्ध ८ / अध्याय – १५-२३

23 श्रीमद्भागवतपुराणम् – स्कन्ध ४ / अध्याय – १५-२४

24 श्रीमद्भागवतपुराणम् – स्कन्ध ६ / अध्याय – ९,१७

25 श्रीमद्भागवतपुराणम् – स्कन्ध ५ / अध्याय – १

26 श्रीमद्भागवतपुराणम् – स्कन्ध ३ / अध्याय – २१-२३

27 श्रीमद्भागवतपुराणम् – स्कन्ध ६ / अध्याय – १०

28 श्रीमद्भागवतपुराणम् – स्कन्ध ३ / अध्याय – २२,२३

29 श्रीमद्भागवतपुराणम् – स्कन्ध १ / अध्याय – ८

30 श्रीमद्भागवतपुराणम् – स्कन्ध ४ / अध्याय – १-७

31 श्रीमद्भागवतपुराणम् – स्कन्ध ३ / अध्याय – १४

32 श्रीमद्भागवतपुराणम् – स्कन्ध ८ / अध्याय – १६

33 प्रचलिता उक्तिः ॥

34 प्रचलिता उक्तिः ॥

35 स्वामिनारायणसंप्रदायः ॥

36 पूर्वतने बिन्दौ ( बिन्दक्रमः – २ ) प्रतिपादिताः सप्तफलसिद्धयः ॥

http://vidyajournal.org

✓ **बौधिकात्मनिर्भरता श्रीमद्भगवतमहापुराणमाध्यमेनानेन संसिध्यति इति मे दृढो विश्वास:।**

**४.१** ॥ अभ्यर्थना ॥

**यथा श्रुतं भागवते परीक्षा विद्यावतां शास्त्रविदां समाजे ।**

**तथा न कार्या मदिये प्रयत्ने न चात्र विद्या न च शास्त्रबुद्धिः ॥ ३ ॥**[37]

**अथापि बुद्धिर्न तथा प्रभावती यथा प्रभावी प्रतिभा च मे गुरोः ।**

**तथापि वृद्धिं ह्यभिकाङ्क्षया च मे समर्पितोऽयं निजशोधलेखः ॥ ४ ॥**[38]

**प्राप्तश्चावसरो धन्यः शोधलेखे समर्पिते ।**

**ततो ह्यभ्युदयो मह्यं प्रसादाच्छिवसन्निधौ ॥ ५ ॥**[39]

## ॥ सन्दर्भग्रन्थसूचिः ॥


1. श्रीमद्भागवतमहापुराणम् । (अनेक व्याख्या समलङ्कृतम्, स्कन्धः – १ तः १२), संपादकः – कृष्णशङ्कर शास्त्री, प्रकाशकः, वि.संवत् २०२२.
2. श्रीमद्भागवतमहापुराणम् । (प्राचीना देवनागरी-वाचना), संपादकः – डॉ. केशवराम काशीराम शास्त्री, प्रकाशिका – श्रीमद्वल्लभ – विश्वधर्म संस्था अहमदाबाद, आवृत्तिः – प्रथमा, वि.संवत् – २०५८.
3. રામાયણ, મહાભારત અને ભાગવત ચિન્તન અને મન્થન. , લેખક – દિનકર જોષી, પ્રકાશક – પ્રવીણચંદ્ર એમ પટેલ, આવૃત્તિ – પ્રથમ વર્ષ -૨૦૦૬.
4. શ્રીમદ્ભાગવત-દર્પણ. , લેખક – (મુ.) કૃષ્ણશંકર શાસ્ત્રી, (અનુવાદ) ચતુર્ભુજ તોષનીવાલ, પ્રકાશક – શ્રી ભાગવત વિદ્યાપિઠ, આવૃત્તિ – પ્રથમ, વર્ષ – ૨૦૦૦.
5. શ્રીમદ્ભાગવત-વૈશિષ્ટ્યમ્. , લેખક – હેમાંગભાઇ શાસ્ત્રી, મુદ્રક – ઓફસેટ પ્રિન્ટર્સ, અમદાવાદ, વર્ષ – ૨૦૦૧.


http://vidyajournal.org

[37] स्वनिर्मितपद्यम् ३ ।

[38] स्वनिर्मितपद्यम् ४ ।

[39] स्वनिर्मितपद्यम् ५ ।